प्रवेश सं०

विषय: धर्मशास्त्र

क्रम सं०

नाम चतुर्विंशति स्मृति व्याख्या

ग्रन्थकार

पत्र सं० १-१७, १९-२८, ३१ अप्राप्त २९, ३०, ३२

श्लोक सं०

अक्षर सं० (पंक्तौ) ३६

पंक्ति सं० (पृष्ठे) ८

आकार: १० × ४.३.

लिपि: दे.ना.

आधार: का०

13900 ग.१८६०

वि० विवरणम् अपू०

३७. ८१४४

पी० एस० यू० पा०—७७ एस० सी० ई०—१६५१—५० ०००

Indira Gandhi National Centre for the Arts

ग।
३२१८

२

५

Indira Gandhi National
Centre for the Arts

श्रीगणेशाय नमः अथ प्रायश्चित्तप्रकरणं प्रायश्चित्तशब्दश्च पापनिवर्त्तनधर्मविशेषे योग
रूढः प्रायस्य पापस्य चित्तं शोधनमिति व्युत्पत्तेः प्रायस्य चित्ति चित्तयोरिति पारस्करादिगणपा
ठात्सुट् प्रायः पापं विनिर्दिष्टं चित्तं तस्य विशोधनमिति मूले प्रायो नाम तपः प्रोक्तं चित्तं निश्च
य उच्यते। तपो निश्चयसंयोगात्प्रायश्चित्तं प्रकीर्त्तितमिति पापं चाष्टधा महापातकं अनुपा
तकं उपपातकं जातिभ्रंशकरं संकरीकरणं अपात्रीकरणं मलिनीकरणं प्रकीर्णकं चे
ति। तत्र महापातकान्याह मूले ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः महान्ति पातकान्याहुस्तत्
संसर्गश्च पंचममिति याज्ञवल्क्यः गुरूणां मध्यविक्षेपो वेदनिंदा सुहृद्वधः ब्रह्महत्यासमं ज्ञे
यमधीतस्य च नाशनं निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतं रजस्वलामुखास्वादः सुरापान राम०
समानि तु अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा निक्षेपस्य च सर्वं हि सुवर्णस्तेयसंमितं सखि १

भार्याकुमारीषु स्वयोनिष्वंत्यजासु च सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतमिति उपपातका
न्याह स एव गोवधो व्रात्यता स्तेयं ऋणानां चानपक्रिया अनाहिताग्निता पण्यविक्रयः परिवेद
नं भृताद्ध्ययनादानं भृतकाध्यापनं तथा पारदार्यं पारिवित्यं वार्धुष्यं लवणक्रिया स्त्रीशूद्र
विट्क्षत्रवधो निंदितार्थोपजीवनं नास्तिक्यं व्रतलोपश्च सुतानां चैव विक्रयः धान्यकुप्यपशुस्ते
यमयाज्यानां च याजनं पितृमातृसुतत्यागस्तडागारामविक्रयः हीनदक्षिणयाजित्वं क्रतुविक्र
यणं तथा कन्यासंदूषणं चैव परिविंदकयाजनं कन्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनं आत्म
नोर्थे क्रियारंभो मद्यपस्त्रीनिषेवणं स्वाध्यायाग्निसुतत्यागो बांधवत्याग एव च इंधनार्थं द्रुमच्छेदः
स्त्रीहिंसौषधिजीवनं हिंस्रयंत्रविधानं च व्यसनान्यात्मविक्रयः शूद्रप्रैष्यं हीनसख्यं हीनयो
निनिषेवणं। तथैवानाश्रमे वासः परान्नपरिपुष्टता। असच्छास्त्राधिगमनं आकरेष्वधिकारि

Indira Gandhi National
Centre for the Arts

ता। भार्यायाविक्रयश्चैषामेकैकमुपपातकमिति जातिभ्रंशकरप्रभृतीन्याह मनुः ब्राह्मण
स्यरुजः कृत्वाघ्रातिरघ्रेयमद्ययोः जैह्म्यंचपुंसिमैथुन्यंजातिभ्रंशकरंस्मृतं खराश्वोष्ट्रमृगे
भानामजाविकवधस्तथा· संकरीकरणंज्ञेयंमीनाहिमहिषस्यच निंदितेभ्योधनादानंवाणि
ज्यंशूद्रसेवनं अपात्रीकरणंज्ञेयमसत्यस्यचभाषणं क्रमिकीटवयोहत्यामद्यानुगतभोजनं
फलैधःकुसुमस्तेयोअधैर्यंचमलावहमिति अन्योन्यत्सर्वंप्रकीर्णकमिति तदुक्तंवृहद्विष्णु
ना यदनुक्तंचतत्प्रकीर्णकमिति तत्रब्रह्मणःब्राह्मणस्यहननंब्रह्महत्या प्राणवियोगानुकूलो
व्यापारोहननेरर्थः यदनंतरंपुरुषव्यापारंविनैवमरणंभवति। तद्व्याव्यवधानेनकालांतरेणवे
त्यन्यदेतत्। यस्ययास्सुरानिषिद्धातस्याःपानं स्तेयंब्राह्मणसुवर्णहरणं ब्राह्मणसुवर्णहरणं रामः
महापातकमित्यापस्तंवस्मरणात्· गुर्वंगनागमोगुरुभार्यागमनं तत्संसर्गःब्रह्महादिभिःसमंव २

षपर्यंतंवासः एभिस्तुसंवसेद्योवैवत्सरंसोपितत्समइतियाज्ञवल्क्यस्मरणात् संवसेदिति।
सहयानादिचतुष्टयंकुर्वन्नन्वसेदित्यर्थः तथाचवृहद्विष्णुःसंवत्सरेणपततिपतितेनसहाचरन्
एकयानभोजनासनशयनैरिति एकयानेएकतुरगाद्यारोहणे एकभोजनं एकपंक्तिभोजनंए
कपात्रभोजनात्तुसद्यःपातित्यं याजनंयोनिसंबंधस्वाध्यायंसहभोजनं कृत्वासद्यःपतत्येवप
न तितेनसंशयइतिदेवलस्मरणात् अत्रचएकयानादिचतुष्टयस्यसमुदितस्यैवपतनहेतुत्वं
हृदयनिर्देशात्। याजनादीनांतुप्रत्येकं यःपतितैःसहयौनसुख्यश्रौतानामन्यतमसंबंधंकुर्यात्
तस्याप्येतदेवप्रायश्चित्तमितिमनुस्मरणात् एतानिमहांतिपातयंतिकर्मानधिकारंकुर्वंतीति
पातकान्याहुः चकारोनुग्रहादिसंग्राहार्थः तत्रयःपलायमानममित्रमुपरुंधन्यरेभ्यश्चहंता
रंरक्षन्हंतारमुपष्टंभातिसोनुग्राहकः तस्यचहिंसकतांदर्शयतिमनुः वहूनामेककार्याणांस

Indira Gandhi National
Centre for the Arts

वैषांशस्त्रधारिणां यद्येकोघातयेत्तत्रसर्वेतेघातकाःस्मृताइतिआपस्तंवःप्रयोजितानुमंता
कर्त्तृचेति स्वर्गनरकफलेषुकर्मसुभागिनोभूयआरभतेतस्मिन्फलविशेषइति तत्रअ
ज्ञानेनप्रार्थनया उपदेशेनवाऽप्रवृत्तस्यप्रयोजकःप्रवर्त्तयिता यत्रराजाद्यनुमतिंविनान्नहिंसा
निर्वाहस्तत्रानुमंतापिघातकः तथाचानिमित्तंभर्त्से नादिनाकोपंजनयन्निमित्तकर्त्ता सोपि
घातकइत्याहविष्णुः आक्रुष्टस्ताडितोवापिधनैर्वाविप्रयोजितः यमुद्दिश्यत्यजेत्प्राणांस्तमाहु
र्ब्रह्मघातिनमिति तत्रसाक्षात्कर्त्रपेक्षयाऽनुग्राहकस्याऽल्पोदोषः तस्मात्प्रयोजकस्य·तस्मा
दनुमंतुःतस्मान्निमित्तकर्त्तुःप्रायश्चित्तमपितद्वत् यस्तून्मादादिनानिरपराधमेवकंचिदुद्दि
श्यप्राणान्परित्यजतितत्रेत्थंस्मर्यते· अकारणंतुयःकश्चिद्द्विजःप्राणान्परित्यजेत् तस्यैव राम०
तत्रदोषःस्यान्नतुयंपरिकीर्त्तयेदिति तथाऽपन्नआक्रुष्टस्ताडितोवेतिप्रागुक्तविषयेपिमर ३

णादर्वागेवधनदानादिनासंतोषितःसन्उच्चैःश्रावयतिनाक्रोशकस्यापराधइतितत्राप्यदोषइ
त्याह विष्णुःउद्दिश्यकुपितोहत्वातोषितःश्रावयेत्पुनःतस्मिन्मृतेनदोषोस्तिद्वयोरुच्छ्रावणेकृ
तइति। हत्वेत्यात्मानमेवखड्गादिनाप्रहृत्येत्यर्थः तथापरोपकारार्थंप्रवृत्तस्यक्वचिद्दु[illegible]चनाद्दो
षाभावःयथाहसंवर्त्तः·वंधनेगोश्चिकित्सार्थेगूढगर्भविमोचने यत्नेकृतेविपत्तिश्चेत्प्रायश्चित्तं
नविद्यते औषधंस्नेहमाहारंददद्गोब्राह्मणादिषु दीयमानेविपत्तिश्चेन्नसपापेनलिप्यते·दा
हच्छेदशिराभेदप्रयत्नैरुपकुर्वतां प्राणिसंत्राणसिद्ध्यर्थंप्रायश्चित्तंनविद्यतइति एतच्चदानानिपु
णाभिषग्विषयंइतरस्यभिषङ्मिथ्याचरन्दाप्यइतिदोषस्यदर्शितत्वात्॥ ॥इतिमहापातकस्वरू
पनिरूपणं॥ ॥गुरूणांआधिक्येनाधिक्षेपःज्ञानाज्ञानमिथ्याभिशंसनमितियावत् गुरोरनृताभि
शंसनमितिमहापातकसमानीतिगौतमस्मरणात्। नास्तिक्याभिनिवेशेनवेदनिंदा सुहृन्मित्रं

Indira Gandhi National
Centre for the Arts

तस्याब्राह्मणस्यापिवधः अधीतस्यवेदस्य असच्छास्त्रविनोदेनालस्यादिनावाविस्मरणं एता
निप्रत्येकंब्रह्महत्यासमानि निषिद्धस्यलशुनादेर्मतिपूर्वकंभक्षणं जैह्म्यंकौटिल्यं तच्चेहगुरु
तरकार्यविषयकंबोध्यं तथाःत्मोत्कर्षराजकुलादौचतुर्वेदोहमित्याद्यनृतभाषणं।रजस्वलाया
मुखास्वादनं एतानिसुरापानसमानि अश्वादीनांब्राह्मणसंबंधिनांनिक्षेपस्यसुवर्णव्यतिरिक्त आ
स्यसुवर्णस्तेयसमः सखामित्रंतस्यभार्या कुमारीउत्तमजातीयाकन्या स्वयोनिर्भगिनी अंत्यजा
डाली सगोत्रासमानगोत्रासुतस्त्रीस्नुषा एतासांगमनंप्रत्येकंगुरुतल्पसमं स्वगोत्राग्रहणेनै
वसिद्धेपुनःसुतस्त्रीत्युक्तिःप्रायश्चित्ताधिक्यप्रतिपादनार्था गुरुतल्पातिदेशांतरमाहयाज्ञवल्क्यः रम॰
पितुस्वसारंमातुश्चमातुलानींस्नुषामपि। मातुःसपत्नींभगिनींआचार्यतनयांतथा आचार्यप ४
त्नींतनयांगच्छंस्तुगुरुतल्पगः।लिंगंछित्वावधस्तस्यसकामायास्त्रियाअपि। अयंचवधःदंड

५ र्थंप्रायश्चित्तंचैतदेव। एतच्चब्राह्मणेतिरिक्तविषयं एतानिचमहापातकातिदेशविषयीभू
तानिसद्यःपतनहेतुत्वात्पातकान्युच्यंते गौतमःपुनरन्यान्यपिपातकान्याह मातृपितृयो
निसंबद्धागस्तेननास्तिकनिंदितकर्माभ्यासपतितात्याग्यपतितत्यागिनश्चपतिताःपातक
संयोजकाश्चेति एतद्व्याचष्टेहरदत्तः मातृसंबद्धामातृपक्षे अर्वाक्पंचमाद्ब्रुवाःपितृसंबद्धा
अर्वाक्सप्तमाद्ब्रुवा योनिसंबद्धाभगिन्यादयःयएताभार्यात्वेनाधिगच्छतिसमातृपितृसंबद्धाग
स्तेनोब्राह्मणसुवर्णापहारी नास्तिकःप्रेत्यभावापवादी निंदितंप्रतिषिद्धंतत्बुद्धिपूर्वंसातत्येन
योनुतिष्ठतिसनिंदितकर्माभ्यासी पतितात्युत्यागी स्नेहादिनायोनत्यजतिसपतितात्यागीयःपर
स्त्वपतितानपिद्वेषादिनात्यजतिसोपतितत्यागी एतेसर्वेपतिताःतथापातकैःकर्मभिर्येपरा
न्संयोजयंतिप्रवर्तयंतीतियावत्तेपितथा।उपपापेतुरीयंस्यात्तनरकंचषसंख्ययेति इत्यनुपा

Indira Gandhi National
Centre for the Arts

तकस्वरूपनिरूपणं॥ ॥काले अनुपनीतत्वंव्रात्यता ब्राह्मणसुवर्णेतत्समव्यतिरिक्तपरद्र
व्यापहरणंस्तेयं। देवर्षिपितृऋणानांलौकिकस्यऋणस्यचानपाकरणं। तथासत्यधिकारे
ऽनाहिताग्नित्वं। तथाः पण्यस्यलवणादेर्विक्रयः परिवेदनंसहोदराज्ज्येष्ठात्प्रागेवकनीयसो
वे भ्रातुर्दाराग्निहोत्रसंबंधः पणपूर्वकंयोऽध्यापयतितस्मादध्ययनग्रहणंपणपूर्वाध्यापनंच
पारदार्यंगुरुदारतत्समव्यतिरेकेण तथापारिवित्त्यंकनीयसिभ्रातरिकृतविवाहेज्येष्ठस्य
विवाहराहित्यं वार्द्धुष्यं प्रतिषिद्धवृद्ध्युपजीवित्वं, तथालवणस्योत्पादनं। तथास्त्रीवधः ब्रा
[illegible] ह्मण्या अब्राह्मण्यावा आत्रेयीभिन्नायाःहिंसाशूद्रवधः अदीक्षितविट्क्षत्रवधः निंदिता
[illegible] र्थोपजीवनं अन्यायार्जितद्रव्योपजीवनं नास्तिक्यंपरलोकोनास्तीत्यभिनिवेशः व्रतलोपोब्रह्म एम० २
[illegible] चारिणस्त्रीसंगः सुतानामपत्यानांविक्रयःधान्यादीनां चौर्यं। स्वर्णरूप्याभ्यामन्यंत्रपुसीसादिकु
[illegible]

प्यं। गोवधोव्रात्यतास्तेयमितिस्तेयग्रहणेनैवसिद्धेधान्यकुप्यादिस्तेयग्रहणंप्रायश्चित्तगौरवा
र्थंएवंबांधवत्यागग्रहणेनैवसिद्धेपुनःपित्रादित्यागग्रहणं पित्रोर्ध्यं। अज्योयानांजानिकर्म्मद
ष्टानांशूद्रब्रात्यादीनांयाजनं पित्रादीनामपतितानांत्यागोगृहान्निष्काषणं। कन्यादूषणंअंगु
ल्यादिनायोनिविदारणंनसंभोगः तस्यसखिभार्याकुमारीष्वितिगुरुतल्पसमत्वेनोक्तत्वात् व्र
तलोपनंसम्यक्संकल्पजः कामइत्यनेनप्रतिपादितस्य मयाभोजनव्यतिरेकेणउदकंनया
तव्यमित्येवमादिर्निनियमस्यलोपः क्रियारंभः पाकारंभः अद्यंसकेवलंभुंक्तेयः पचत्यात्मका
रणात् इतिवचनात् मद्यपायास्त्रियोजायायाअपिनिषेवणमुपभोगः स्वाध्यायस्यत्यागःकुटुं
वभरणव्यग्रतयाऽसच्छास्त्रश्रवणव्यग्रतयावाविस्मरणं श्रौतस्मार्दिग्नित्यागस्यब्रह्महत्यास
मत्वेनोक्तत्वात् अग्नीनांश्रौतस्मार्त्ताग्नीनांत्यागःसुतत्यागःसंस्काराद्यकरणं बांधवानांपितृव्य

Indira Gandhi National
Centre for the Arts

मातुलादीनां त्यागः सति संभवे ऽपरिरक्षणं याकादिदृष्टप्रयोजनसिद्ध्यर्थमार्द्रद्रुमच्छेदः तथा
स्त्रियाजीवनं भार्यापण्यभावेन प्रयोज्य तल्लब्धोपजीवनं स्त्रीधनोपजीवनं वा· हिंसयाजीवनं
औषधेन वशीकरणादिना। हिंस्रयंत्रस्यातिलेक्षुपीडाकरणस्य प्रवर्त्तनं। व्यसनानि मृगया
दीन्यद्यूरश· तथा हीनयोनिनिषेवणं अकृतसवर्णदारस्य केवलहीनवर्णदारोपगमनं· सा
धारणस्त्रीसंभोगश्च तथा ऽगृहीताश्रमता असच्छास्त्रस्य चार्वाकादिग्रंथस्य चाधिगमः आ
करेषु सुवर्णाद्युत्पत्तिस्थानेषु राजाज्ञया ऽधिकारः चशब्दादभिचारादिस्मृतिग्रहादिकं गृह्यते।
तथा च मनुः हिंसौषधीनां स्त्र्याजीवोभिचारो मूलकर्म च। आत्मार्थं च क्रियारंभो निंदितान्नादनं
तथा असच्छास्त्राभिगमनं कौशीलव्यस्य च क्रियेति। अभिचारः श्येनादीनां मारणं। मूलकर्म एम· दिता
मंत्रौषधादिना वशीकरणं निंदितान्नस्य लशुनादेस्स कृदनिच्छया भक्षणं। बुद्धिपूर्वकाभ्यासभ ह

क्षणे तु सुरापानसमेषु बोध्यं। तथा च मनुः ब्रह्मोज्झिता वेदनिंदा कौटसाक्ष्यं सुहृद्वधः गर्हिता
न्नाद्ययोर्जग्धिः सुरापानसमानि षट् इति। गर्हितं लशुनादि तथा न भोज्यमेतन्मयेति सं
कल्प्य यद्भुज्यते तदन्नाद्यं। अक्रतुमर्हत्यादि निमेधातिथिः कौशीलव्यं नृत्यगीतवादित्रोपसे
वनं। इत्युपपातकस्वरूपनिरूपणं ब्राह्मणस्य रुजः कृत्वा दंडक्रिया। अघ्रेयस्य लशुन
पुरीषादेर्मद्यस्य च घ्रातिरघ्राणं। इत्यादीनि जातिभ्रंशकराणि खरादीनां वधः गर्दभतुरगो
ष्ट्रमृगहस्तिच्छागमेषमत्स्यसर्पमहिषाणां वधः प्रत्येकं संकरीकरणं ज्ञेयं तथा ऽनृताभि
धानपर्यंतानि चत्वारि प्रत्येकमपात्रीकरणानि कृमिकीटपक्षिणां हिंसा तथा मद्यानुगतं
स्यमघेनसहैकस्मिन्पिटकादावानीतस्य फलमूलादेर्भोजनमिति बहवः मेधातिथिस्तु मद्या
नुगतं मद्यसंस्पृष्टमिति व्याचष्ट। फलकाष्ठप्रभृतीनां चौर्यं स्त्वल्पेपि निमित्ते अतिवेलं व्य·

Indira Gandhi National
Centre for the Arts

मधेयं। एतानि मलावहानि। अन्यानि प्रकीर्णकानीति विवेकः अतिपातकानि तु विष्णुराह। मातृग
मनं दुहितृगमनं स्नुषागमनमित्यतिपातकानीति। कात्यायनस्तु महापातकसमानां विष्णुप्रभृतिभि
त रनुपातकं योक्तानां पातकसंज्ञामाह महापापं चातिपापं तथा पातकमेव च प्रासंगिकं चोपपापमि
६ त्येवं पंचकोगणः इत्युद्देशप्रकरणं अथ ब्रह्महत्या प्रायश्चित्तं मूलं ब्रह्महा द्वादशाब्दानि कृच्छ्रं कुर्याद्
तं चरन् चातुर्वर्ण्यं चरेद्भिक्षां नत्वा पं ख्यापयन्स्वदा ब्रह्मचर्यादिव्रतयुक्तः प्राजापत्यं कृच्छ्रं षष्ट्यधि
कशतत्रयं चरित्वा शुद्ध इति फलितोर्थः मनुः ब्रह्महा द्वादश समाः कुटीं कृत्वा वने वसेत्। भैक्ष्यस्यात्म
विशुद्ध्यर्थं कृत्वा शवशिरोध्वजं रंजायस मारोपितं शिरः कपालं ध्वज शरं वा च्यमिति विज्ञानेश्वरः त राम०
च्च कपालं स्वव्यापादित ब्राह्मणस्यैव संबंधि ग्राह्यं तथा च शातातपः ब्राह्मणं घातयित्वा तस्यैव शिरः
कपालमादायेति तदलाभे त्वन्यस्य निवासस्थानान्याह मनुरेव। कृतवापनो वा निवसेद्ग्रामांते गोव्रजेपि

वा। आश्रमे वृक्षमूले वा सर्वभूतहिते रत इति कृतवापनो वेति विकल्पाभिधानं तु ब्रह्महा द्वादशाब्दानि वा
लवासा जटी ध्वजीति संवर्तोक्तजटाभिप्रायेण यमः सप्तागाराण्यपूर्वाणि यान्यसंकल्पितानि च संवि
शेत्तानि शनकैर्विधूमे भुक्तवज्जने ब्रह्मघ्ने देहि मे भिक्षामेनो विख्याप्य संचरेत् एककालं चरेद्भैक्ष्यं तदल
भ्योदकं पिबेत् इति। गौतमः स्थानासनाभ्यां विहरन्सवनेषूदकस्पर्शी शुद्ध्येदिति स्थानासनाभ्यामित्यनेन ना
उत्थितस्तु दिवा तिष्ठेदुपविष्टस्तथा निशि एतद्वीरासनं नाम सर्वपापप्रणाशनमिति स्मृत्यंतरोक्तमर्थम
भिप्रैति। सवनेष्वित्यनेन त्रिषवणस्नानं विदधत्तदंगभूतमंत्रादिप्राप्तिमनुमनुते। तथा शुचिना कर्म
कर्त्तव्यमित्यस्य सर्वकर्मसाधारणत्वात्। व्रतचर्यांगभूतशौचसंपत्त्यर्थं संध्योपासनमपि कार्यं। तस्या
पि शौचापादनद्वारेण सर्वकर्मशेषत्वात्। तथा च दक्षः संध्याहीनो शुचिर्नित्यमनर्हः सर्वकर्मसु। यत्किंचि
त्कुरुते कर्म न तस्य फलभाग्भवेत् इति। इह च मनुयाज्ञवल्क्यगौतमादिप्रतिपादित द्वादशाब्दव्रतचर्या

त्रिकालस्नानं

Indira Gandhi National
Centre for the Arts

र्न विधीयत इति। अत्र निष्कृतिर्नेत्यादिश्चतुर्थचरणः पूर्वोक्तद्वादशाब्दादिविरह परः द्विगुण व्रतचर्यारूपा तु निष्कृतिः

याः शाखांतराधिकरणन्यायेनैकांगुणोपसंहारन्यायेन सर्वांगोपसंहारो बोध्यः इदं चाकामकृतविषयं
तथा च मनुः। इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजं। कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते इति व्याख्याता
रः हरदत्तस्तु त्रीणि प्रथमान्यनिर्देश्यानि मनुरिति गौतमवाक्यं व्याचक्षाणः ब्रह्महत्यासुरापानगुरुतल्प
गमनान्यनिर्देश्यप्रायश्चित्तानीति मनुराहेति वर्णयित्वा मतिपूर्वमनिर्देश्यं प्राणांतिकमिति स्थितिरि
ति कामतो ब्राह्मणवध इति च मनुवचनं तत्र संवादार्थमुपन्यस्तवान्। कलिनिषिद्धेषु प्रायश्चित्तविधानं
च विप्राणां मरणांतिकमिति स्तेयान्यमहापातकनिष्कृति~~र्वयाप्रयोगेनो साहृतं न विस्मर्तव्यं। इह यद्यपि द्वि~~ न
~~त्रिब्राह्मणवधे प्रतिनिमित्तं नैमित्तिकप्रसंगेपि देशकालकर्त्रैक्येन गृह्यमाणविशेषत्वात्तंत्रमेव न्या~~
~~य्यं प्रयाजादिवत् युगपदनेकग्रहदाहेष्टिवन्निमित्तकसामवतो वहृतथापि वचनादावृत्तिरेवेत्यवधेयं~~ राम०
~~तथा च मनुदेवलौ। विधेः प्राथमिकादस्माद्द्वितीये द्विगुणं चरेत् तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृति~~ ८

रिति च प्रागेवोदाहृतं न विस्मर्तव्यं। इह यद्यपि द्वित्रिब्राह्मणवधे प्रतिनिमित्तं नैमित्तिकप्रसंगेपि देश
कालकर्त्रैक्येन गृह्यमाणविशेषत्वात्तंत्रमेव न्याय्यं। प्रयाजादिवत्। युगपदनेकगृहदाहेष्टिवन्निमि
त्तकसामवतो वहृतथापि वचनादावृत्तिरेवेत्यवधेयं तथा च मनुदेवलौ। विधेः प्राथमिकादस्माद्द्विती ९
ये द्विगुणं चरेत्। तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिरिति च चतुर्थ्याद्यावृत्तिनिमित्तमावृत्ति वि
धीयतेऽतो न वाक्यभेदः त्रीन्गृणीतरस्यादिवत् चतुर्थे नास्ति निष्कृतिरिति महापातकाभिप्रायं। शूद्रान्न
सेवनादौ तु बहुशोप्यभ्यस्त आवृत्तिः कल्प्येवेत्याहुः अत एव मनुः पूर्णे चानस्यनस्यां तु शूद्रहत्याव्रतं चरे
त् इति। इदं च द्वादशवार्षिकं साक्षाद्धंतुरेव। अनुग्राहकस्य पादोनं। प्रयोजकस्यार्द्धं अनुमंतुस्सार्द्धपादं
निमित्तिनस्तु पादं तथा च मनुः निरस्क्रतोयदा विप्रो हत्वात्मानं मृतो यदि निर्गुणः सहसाक्रोधाद्गृहक्षेत्रा
दिकारणात् त्रिवार्षिकं व्रतं कुर्यात्प्रतिलोमां सरस्वतीं। गच्छेद्वापि विशुद्ध्यर्थं तस्या पस्येति निश्चितं अत्र

Indira Gandhi National
Centre for the Arts

स्य

नि र्थंनिर्गुणो विप्रो हर्यर्थं निर्गुणोपरि· क्रोधाद्धि म्रियते यस्तु निमित्तं त्वभिसंस्थितः वत्सरत्रितयं कुर्यात्ततः कृच्छ्रं
विशुद्ध्यतीति। यस्तु नस्तेनैवोक्तं। केशश्मश्रुनखादीनां कृत्वा तु वपनं वने। ब्रह्मचर्यं चरन्विप्रो वर्षेणैकेन शु
द्ध्यतीति। तत्तु निर्निमित्तत्वेनास्थितगुणवत्वे आत्मघातिनश्चास्थितनिर्गुणत्वे च बोध्यं। बालवृद्धादीनां साक्षा
त्कर्तृत्वेप्यर्द्धमेव अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः प्रायश्चित्तार्द्धमर्हति स्त्रियो रोगिण एव चेत्सं
गिरःस्मरणात्। मूले प्रायश्चित्तं यदाम्नातं कामतोऽकामतोऽपि वा। तदर्द्धं भवति स्त्रीणां मतं शेषेष्वपि प्रभु
तथा अर्वाक्तु द्वादशाद्वर्षाद् शीतेरूर्द्धमेव वा। अर्द्धमेव भवेत्पुंसां तुरीयं तत्र योषितामिति। अनुपनीतस्य तु
पादमात्रमेव प्रायश्चित्तं· स्त्रीणामर्द्धं प्रदातव्यं वृद्धानां रोगिणां तथा। पादो बालेषु दातव्यः सर्वपापेष्वयं वि
धिरिति विष्णुस्मरणाच्च। तत्र कर्त्तुः प्रतिनिधिमाह यमः अपूर्णैकादशाब्दस्य चतुर्वर्षाधिकस्य च प्रायश्चि राम•
त्तं चरेन्माताऽन्यो वाप्यस्य बांधवा इति। बालतरेषु तु पादादप्यूनं कल्प्यमिति माधवः अतो बालतरस्यास्य ९

नापराधो न पातकं। राजदंडो न तस्यास्ति प्रायश्चित्तं न विद्यत इति यमवचनमपि प्रायश्चित्ताल्पत्वपरं न पु
नः सर्वात्मना तदभावपरमित्याहुः यस्तु नर्मध्यमांगिरोवचनं। गवां सहस्रं विधिवत्पात्रेभ्यः प्रतिपादयेत्
ब्रह्महापि विमुच्येत सर्वपापेभ्य एव चेति तद्द्विगुणं सवनस्ये तु ब्राह्मणे व्रतमादिशेदित्येनद्याकवि
हितद्विगुणव्रताचरणाशक्तस्य बोध्यं प्रायश्चित्तस्यातिगुरुत्वात्। यदपि शंखवचनं प्रमाप्य द्वादशसं
वत्सरान्नूषट्त्रीनसार्द्धसंवत्सरं व्रतान्यादिशेत् तेषामंते गोसहस्रं तदर्द्धं तस्यार्द्धमर्द्धं च दद्यात्सर्वेषां
वर्णानामानुपूर्व्येणेति। द्वादशवार्षिकगोसहस्रयोः समुच्चयविधिपरं· तदाचार्यादिह ननविषयकं द्र
ष्टव्यं· तथा च दक्षः सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे आचार्ये शतसाहस्रं सोदर्ये दत्तमक्षयं· स
मं द्विगुणसाहस्रमानंत्यं च यथाक्रमं दानफलविशेषस्याहिंसायां न हृदेव हीति। नन्वेवं वचनांतरसा
पेक्षत्वे नोदाहृतया व्यवस्थोच्यते सा तु नाम यत्र तु विनैव वचनं व्यवस्था कल्प्यते सा कथं श्रद्धेयेति चेन्मैवं·

Indira Gandhi National
Centre for the Arts

स्मृतिकारैरेव कल्पनीयताभिधानात्। तथा च देवलः ज्ञातिशक्तिगुणापेक्षं सकृद्बुद्धिकृतं तथा अनुबंधा
दि विज्ञाय प्रायश्चित्तं प्रकल्पयेदिति। उक्तस्य द्वादशवार्षिकस्य समाप्त्यवधीनाह याज्ञवल्क्यः ब्राह्मणस्य
परित्राणाद्गवां द्वादशकस्य वा तथाश्वमेधावभृथस्नानाद्वा शुद्धिमाप्नुयात्। दीर्घतीव्रामयग्रस्तं ब्राह्मणं गा
मथापि वा। दृष्ट्वा पथि निरातंकं कृत्वा वा ब्रह्महा शुचिः। आनीय विप्रसर्वस्वं हृतं घातित एव वा। तन्निमित्तं क्षतः
शस्त्रैर्जीवन्नपि विशुध्यति। न चैनानि ब्राह्मणपरित्राणादीनि द्वादशवार्षिकेण तुल्यफलकानि स्वतंत्राणे
व नत्वंगानीति भ्रमितव्यं। द्वादशवर्षे शुद्धिं प्राप्नोत्यंतरा वा ब्राह्मणं मोचयित्वा गवां वा द्वादशानां परित्राणात्
सद्य एवाश्वमेधावभृथस्नानाद्वा पूतो भवतीति शंखस्मरणेनांगत्वावधारणात्। व्रतांतराणि मनुराह। लक्ष्यं
शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः। प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः। यजेत वाश्वमेधेन क्षत्रियो एम॰ १०
ब्रह्मघातकः प्रायश्चित्तमयं ह्युत नक्षत्रियस्य प्रकीर्तितं। क्षत्रियो निर्गुणो वीरब्राह्मणं चाग्निहोत्रिणं। निहत्य

कामेनात्मानं क्षिपेदग्नावेवाक्शिराः। निर्गुणं ब्राह्मणं हत्वाकामतो गुणवान्शुद्। यजेत वाश्वमेधेन क्षत्रियो
यो महीपतिरिति इदं चाश्वमेधानुष्ठानं सार्वभौमस्यैव न त्वन्येषां। नासार्वभौमो यजेतेति विप्रतिषेधदर्शना
त्। अत्र हरदत्तः प्रास्येदात्मानमप्यग्नाविति नेदं मरणांतिकं किंतु त्रिरिति नियमात्। उत्थायोत्थाय हि त्रिः पतत्य
दिरेवाग्नौ जीवति तथाप्यसौ शुद्ध एवेति। स्वर्जिदादयस्तु त्रैवर्णिकस्याहिताग्नेरिष्टप्रथमयज्ञस्य द्वादशवार्षि
केण सह विकल्प्यंते। न च संध्योपासनवत्तदनुष्ठानमपि पातित्यावस्थायामस्त्विति वाच्यं। आधानस्योपकार
कत्वेपि उत्तरक्रतुशेषताविरहादित्यन्यत्र विस्तरः। अंगिराः। रहस्योक्तानि पापानि कुर्वत्याश्रमिणो यदि शो
चवच्छोधनं कुर्युर्वाग्ब्रह्मनिदर्शनात्। इति शेषं च यथा ब्रह्मचारिणां द्विगुणं वनस्थानां त्रिगुणं यतीनां चतु
र्गुणं तथा प्रायश्चित्तमपीत्यर्थः। ब्रह्मचारिणश्च प्रायश्चित्ते द्विगुणं षोडशवर्षादूर्ध्वमेव। अर्वाक्तु बालो वा
प्यूनषोडशः प्रायश्चित्तार्धमर्हतीति प्रागुदाहृतवचनेनोर्ध्वस्यैव लाभादिति विज्ञानेश्वरप्रभृतयः। अत्र प्र

Indira Gandhi National
Centre for the Arts

वीराहृतवचनस्य ब्रह्मचारिशुल्कध्यापकोशतयाकथंबाधकता। तस्मादिह केनकिंवासाध्यमिति विनि
गमकं परिभावनीयं। एवं वर्णक्रमेणापि प्रायश्चित्ताधिक्यमाहांगिराः पर्षद्यो ब्राह्मणानां तु साराज्ञां द्वि
गुणा मता वैश्यानां त्रिगुणा प्रोक्ता पर्षद्वच्च व्रतं स्मृतमिति। प्रजापतिरपि द्विगुणं त्रिगुणं चैव चतुर्गुण
मथापि वा। क्षत्रविट्शूद्रजातीनां ब्राह्मणस्य वधे व्रतमिति। प्रकांतप्रायश्चित्तस्य मध्ये विपत्तावपि पापस
योभवत्येव। तथा च हारीतः प्रायश्चित्ते व्यवसिते कर्त्ता यदि विपद्यते। पूतस्तदहरेव स्यादिह लोके परत्र चे
ति। वधोद्यमेपि वधप्रायश्चित्तं कर्त्तव्यं तदाह याज्ञवल्क्यः चरेद्व्रतमहत्वापि घातार्थं चेत्समागत इति।
यथावर्णमित्यनुवर्त्तते। अत्रातिदेशिकेषु पादोनं वोध्यमिति सिद्धांतः प्रसंग हत्यासमानां तु गुर्वधिक्षेपादी
नां आतिदेशिकेभ्यो न्यूनत्वात् अर्द्धोनं प्रायश्चित्तमिति विज्ञानेश्वरः स्मृत्यर्थसारादिष्वेवं। माधवस्तु समे राम•
ष्वपि पादोनमेवाह। अतिदेशांतरमाह याज्ञवल्क्यः यागस्थक्षत्रविड्घाती चरेद्ब्रह्महणि व्रतं। गर्भहा च य ११

---

थावर्णं तथात्रेयीनिषूदकः यागस्थौ प्रारब्धापरिसमापितसोमयागप्रयोगौ क्षत्रियवैश्यौ यो हंति स तथा
भूतः पुंस्त्वस्त्रीत्वादिनानभिव्यक्तं गर्भं यो हंति स यथावर्णं व्रतं चरेत्। हत्वा गर्भमविज्ञातमिति मनुस्मृतेः
विज्ञाने तु यथायथं स्त्रीत्वाद्यनुसारेणैव प्रायश्चित्तं आत्रेयी ऋतुमती। अत्रिगोत्रोत्पन्ना च। तथा च वसिष्ठः
रजस्वलामृतुस्नातामात्रेयीमाहुरत्र ह्येतदपत्यं भवतीति। विष्णुः अत्रिगोत्रभवा नारीति। द्विविधाया आ
त्रेय्याः वधे तत्तदीयवर्णपुरुषवधप्रायश्चित्तं स्यादित्यर्थः। अंगिराः आहिताग्नेर्द्विजाग्र्यस्य हत्वा पत्नीमनिं
ख दितां। ब्रह्महत्याव्रतं कुर्यादात्रेयीघ्नस्तथैव चेति। ननु ब्राह्मणो न हंतव्य इत्यत्रानुवाद्यविशेषणीभूतलिंगस्य ग्रहै
कत्ववदविवक्षितत्वादेवात्रेय्या आहिताग्निपत्न्याश्च पूर्णव्रतप्राप्तेः किमर्थं पुनरुपादानमिति चेत्। अ
नात्रेय्या वधे महापातकत्वनिराकरणार्थमेवेत्यवेहि। अतएव तत्रोपपातकप्रायश्चित्तमात्रं प्रवर्त्तते।
स्त्रीशूद्रक्षत्रवधस्त्वपपातकेषु पाठादिति दिक्। स्थलं। गच्छेद्वाराणसीं वापि सेतुं श्रीपर्वतं तथा। अन्या
यी

Indira Gandhi National
Centre for the Arts

न्यपिचतीर्थानिगायत्रींवाजपेत्सदा अग्निष्टुतावाजपेयेनाश्वमेधेनवाहुजः अन्यैर्वापावनैरिष्ट्वाब्र
ह्महत्यांव्यपोहति अभ्यासेविश्वजिच्चैवज्योतिष्टोमोमहाव्रतं एषामन्यतमेनेष्ट्वाब्रह्महत्यांव्यपोहति
अव्यैत्रसमेषुविकल्पः विषमेषुव्यवस्थाकल्प्येतिसर्वनिबंधसंमतोऽर्थः अतिशक्तिगुणापेक्षसंक
च्छुद्धिकृतंतथेत्यादिकेवलवचनसिद्धिश्च।इदंत्वविशिष्यते। न्यूनत्वरहस्यपरतयामानसपरतयाप्रयो
जकानुमंत्रादिपरतयावहुधासंभवादेकरूपाकल्पनादुर्लभा तथाचस्मृतिकर्तॄणांतात्पर्यनिर्णयो
दुर्लभइति।अत्रमाधवाचार्यैरित्थमेवाशंक्य अतएवनिबंधेषुदृश्यतेनैकवाक्यतेत्यनेननिबंधका
रवचसामपिसत्प्रतिपक्षग्रस्तत्वमुक्तातयापियथापूर्वनिबंधेषूक्तंतथैवचमयालिख्यतइतिव
दद्भिः अतिगहनत्वमेवधर्मस्यस्फुटीकृतमितिनतत्रातीवाभिनिवेष्टव्यं इतिब्रह्महत्याप्रायश्चि राम॰
त्तं। सुरापस्तुसुरांतप्तामाग्न्यंवापितयाविधं पिबेत्तस्यापमोक्षायकणमुग्वाव्रमेवतु। अष्टावर्षंवाचरेत्ल १२

कृपवित्राभिजपेत्सदापुरुषेणनकर्तुनविष्टासुरायानात्समुच्यते। सुरापैष्टी।पानसंद्राक्षमाधुकंखार्जूरंता
लमैक्षवं माधुस्थ्यंसैरमारिष्टंमैरेयंनारिकेलजं।समानानिविजानीयान्मद्यान्येकादशैवतु द्वादशंतुसु
रामद्यंसर्वेषामधमंस्मृतमिति।पुलस्त्येनमद्यविशेषेसुरायानिर्दिष्टत्वात्। यत्तुमनुवचनं। गौडीमाध्वी
चपैष्टीचविज्ञेयात्रिविधासुरेति। तत्रापिसुराशब्दोगौडीमाध्व्योर्गौणः तस्माद्ब्राह्मणराजन्यौवैश्यश्चनसु
रांपिबेदितिमनूक्तोवर्णत्रयसाधारण्येननिषेधपैष्ट्याएव गौड्यादीनांतुमद्यानांब्राह्मणस्यैवनिषेधान
तुक्षत्रियवैश्ययोः तथाचगौतमः नित्यंमद्यंब्राह्मणोवर्जयेदिति तस्मात्सुरापस्त्रैवर्णिकः तत्सामस्त्यंतत्कार्ये
नस्पर्शमात्रान्मरणान्समां पिबेत् ततश्चमृतः शुध्येदित्यर्थः तथाचयाज्ञवल्क्यः सुरांवुघृतगोमूत्रपयसा
मग्निसंनिभं सुरापोऽन्यतमंपीत्वामरणाच्छुद्धिमृच्छतीति अत्रगोमूत्रसाहचर्याद्गव्यएवघृतपयसीघृ
तपयःसाहचर्यात्क्षीरेणमेवगोमूत्रं पैठीनसिः सुरापआर्द्रवासाअग्निवर्णांसुरांपिबेदिति।तथाप्रचेताः सु

Indira Gandhi National
Centre for the Arts

णयोग्निवर्णामायसेनपात्रेणताम्रेणवापिबेदिति एतच्चकामकृते। सुरापानेकामकृते त्वलंनीतांविनि
क्षिपेत्। मुखेनवाविनिर्दग्धोमृतः शुद्धिमवाप्नुयात् इति बृहस्पतिस्मरणात्। गौडीमाध्व्योरभ्यासेताभ्यां
मरणं। व्याघ्रआह मत्यामद्यममत्यावापुनः पीत्वाद्विजोत्तमः ततोऽग्निवर्णांतांपीत्वामृतः शुध्येत्सकि
ल्विषादिति· अकामकृतेतुसुरापाने। याज्ञवल्क्यआह वालवासाजटीवापिब्रह्महत्याव्रतंचरेत्। गोच्छागा
दिनिर्मितवस्त्रपरिवृतोवालवासाः अकामतोमद्यपाने बृहस्पतिराह· पीत्वाप्रमादतोमद्यमतिकृच्छ्रंच
रेद्द्विजः कारयेत्तस्यसंस्कारंशक्त्याविप्रांस्तुभोजयेदिति। तदेतन्मद्यपानप्रायश्चित्तंब्राह्मणस्य। नतुक्षत्रि
यवैश्ययोः ब्राह्मणंप्रत्येवमद्यपानस्यनिषिद्धत्वादित्याहुः वस्तुतस्तुनराश्वमेधौमद्यंचकलौवर्ज्यं द्वि
जातिभिरिति आचारकांडेमाधवोदाहृतब्रह्मपुराणवचनेनकलौसर्वान्प्रतितन्निषेधः स्त्रीवैस्वधर्मं एम॰ १३
प्रायश्चित्तांतरमाह। कणान्वाभक्षयेदब्दंपिण्याकंवासकृन्निशि सुरापानापनुत्यर्थंवालवासाजटीध्वजी। इति
[corrected reading of the second folio follows]

न शुद्ध्यति यदि तु जीवन्नेव विमुक्तः मुसलप्रहारेण न मृत इति यावत् तथापि शुध्यत्येव। तथा च संवर्त्तः
ततो मुसलमादाय सकृद्धन्यात्तु तं स्वयं। यदि जीवति स स्तेनस्ततः स्तेयाद्विमुच्यते इति। विमुक्तो वेत्यत्र
स्वकारान्तरेणापि व्याचष्ट माधवः यत्र स्तेनेन पोष्यास्तदीयं कलत्रादयो बहवः संति तत्र स्तेने मृते ते बहवो पुत्रमित्र
विनंक्ष्यंतीति मत्वा कृपालुना राज्ञा धनदंडादिपुरःसरं स्तेनो मुच्येत तदापि शुद्धो भवत्येवेति। आत्मतुल्य
सुवर्णदानपरस्तु अत्यंतधनिकश्रोत्रियविषयः षड्वार्षिकं तु तीर्थयात्रासहितं निर्द्धनश्रोत्रियविषयमि
ति माधवः स्तेयप्रायश्चित्तं चापहृतधनं स्वामिने दत्त्वैव कार्यं। स्तेये ब्रह्मस्वरूपस्य सुवर्णादेः कृते पुनः स्वा
मिनेपहृतं देयं हर्त्रा त्वेकादशाधिकमिति स्मरणात् हर्त्रेति। अत्र हरणं नाम समक्षं परोक्षं वा बलाच्चौर्ये
ण वा परस्वस्योपादानं एकादशाधिकं एकादशगुणमित्यर्थः इति सुवर्णस्तेयप्रायश्चित्तं मूलं। गुरु रम॰ १४
तल्पे तु कुर्वीतितप्तलोहावगूहनं। लिंगं वा सांडमुत्कृत्य नैऋत्यां दिशि निक्षिपेत्। इति गुरुतल्पगमनप्राय-

श्चित्तं। मूलं। तत्संसर्गविशुध्यर्थं तस्य तस्य व्रतं चरेत्। अत्र पतितसंसर्गनिषेधस्य क्वचित्पतितप्रसवमा
ह वसिष्ठः पतितोत्पन्नः पतितो भवत्यन्यत्र स्त्रियाः सा हि परगामिनी तामरिक्थामुपेयादिति। अरिक्थां
त्यस्मा गृहीतवस्त्रालंकारादिपितृधनामित्यर्थः हारीतोपि पतितस्य कुमारीमहोरात्रमुपोषितां। तु
प्रातः शुक्लेनाहतवाससाच्छादितां नाहमेतेषां न ममैत इति त्रिरुच्चैरभिदधानां स्वगृहे वा उद्वहेदिति।
पतितानुवृत्तौ याज्ञवल्क्यः कन्यां समुद्वहेदेषां सोपवासामकिंचनामिति। तथा पतितोत्पन्नत्वरूपे संसर्गवि
शेषे पुंस एव पतितत्वं न तु कन्याया इति स्थितं मूलपाणिस्तु पतितपुत्रस्येव तत्कन्याया अपि पतितत्वमस्त्ये
व प्रायश्चित्ते तु विशेषः पुत्रस्यार्त्ततीयोंशः कन्यायास्तु नवमोंशः तथा च बौधायनः अशुचिशुक्रोत्पन्नानां
तेषां शुद्धिमिच्छतां प्रायश्चित्तं पतनीयानां तृतीयोंशः स्त्रीणामंशस्तृतीयः इति पतनीयानां। पवित्राणां वा
हुलकात्कर्त्तरिञ नेपरः एवं च याज्ञवल्क्यहारीतयोर्बौधायनस्य च वचनानामेकवाक्यतया सोपवासं

Indira Gandhi National
Centre for the Arts

९५ पातकिप्रायश्चित्तत्तृतीयभागं कारयित्वा विवाहे दित्यर्थः अन्यत्रस्त्रियाश्चनिवसिष्ठवचनं तु यादृशंप
तितत्वं पुंसस्तादृशं पतितत्वं न स्त्रियाः इत्येवंपरमिति व्यवस्था पर्याचकार माधवनिबंधे तु संसर्गदो
षश्च कलौ पातित्यापादको नेति प्रागेवोक्तमित्युक्त्वा पापमात्रापादकत्वं त्वस्त्येवेत्याह पराशरः आस
नात्स्थापनाद्यानात्संभाषात्सहभोजनात् संक्रामंति हि पापानि तैलविंदुरिवांभसीति। तस्मात्कलौ च
त्वार्येवमहापा[redacted]पानि। तत्संसर्गस्तु युगांतरे महापातकं कलौ तु प्रकीर्णकिषुद्रष्टव्य इति स्थितं व्यव
स्थापि इति महापातकप्रायश्चित्तं अतिपातकेष्वनुपातकेषु च पादोनमर्द्धं महापातकप्राय
श्चित्तमित्युक्तं अथोपपातकप्रायश्चित्तं याज्ञवल्क्यः पंचगव्यं पिबन्गोघ्नो मासमासीत संयतः गोष्ठे
शयो गोनुगामी गोप्रदानेन शुद्ध्यति कृच्छ्रं चैवातिकृच्छ्रं च चरेद्वापि समाहितः। दद्यात्त्रिरात्रं चोपोष्य वृषभै राम॰
कादशास्तु गाः अत्रेयं व्यवस्था ब्राह्मणस्वामिकाया गोर्वधे त्रिरात्रोपवासो वृषभैकादशगोदानं च[redacted] ९५

क्षत्रियस्वामिके तु पंचगव्याशित्वादिरूपं प्रथमश्लोकोक्तं प्रायश्चित्तं। वैश्यस्वामिके तु मासमति कृच्छ्रं
शूद्रस्वामिके कृच्छ्रं। बहुकर्तृके तु हनने संवर्त्तोपस्तंबौ विशेषमाहतुः एका चेद्बहुभिः काचिद्दैवाद्व्यापा
दिता क्वचित् पादं पादं तु हत्याया धरेयुस्ते पृथक्पृथगिति। या द्विविधगोहत्यायां यदुक्तमुपदिष्टं प्रत्ये
कं तस्या दं कुर्युः एका चेदित्युपलक्षणं अतो बहुभिर्द्वयोर्बहूनां च व्यापारेण प्रतिपुरुषं पादद्वयं पादोनं
वा कल्पनीयं। यदा त्वेकेनैव रोधनादिना व्यापारेण बहुभिर्योगाद्वा व्यापादिता तत्र संवर्त्तापस्तंबौ विशेषमा
हतुः व्यापन्नानां बहूनां तु रोधने बंधनेपि वा। भिषङ्मिथ्योपचारे च द्विगुणं गोव्रतं चरेदिति। बहुष्वपि व्याप
न्नेषु न प्रतिनिमित्तं नैमित्तिकानुष्ठानं। नापि तंत्रेण। किंतु वचनाद्द्विगुणमेवेत्यर्थः यत्तु पराशरवचनं। ग्रा
मघाते शरोघेण वेश्मभंगान्निपातने। अतिवृष्टिहतानां च प्रायश्चित्तं न विद्यते। कूपखाते च धर्मार्थी गृह
दाहे च या मृता। ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यत इति। इदं बंधनरहिते पशौ बोध्यं। इतरथा त्वाप

Indira Gandhi National
Centre for the Arts

१६ स्तेवेनोक्तं कांतारेषुयद्दुर्गेषुगृहदाहेस्खलेषुच। यदितत्रविपत्तिःस्यात्पादएकोविधीयतइति। इदंतु
प्रायश्चित्तंगोस्वामिनेव्यापन्नगोसदृशींगांदत्वैवकार्यं।तथाचमनुः।यास्थहिंस्याद्द्रव्याणिज्ञानतो
ज्ञानतोपिवा।सतस्योत्पादयेत्तुष्टिंराज्ञेदद्याच्चतत्सममिति। एतच्चप्रायश्चित्तजातंब्राह्मणस्यैवहंतु
र्वेदितव्यं।क्षत्रियादिहंतुश्चतुर्विशेषमाह। बृहद्विष्णुः विप्रेतुसकलंदेयंब्राह्मणस्यमहर्षिभिःपादोनंक्ष
त्रियः कुर्यादर्द्धंवैश्यःसमाचरेत्। शूद्रःसमाचरेत्पादमशेषेष्वपिपाप्मसु। इति। इदंचप्रतिलोम्या
नुष्ठितचतुर्विधसाहसव्यतिरिक्तविषयं। यत्तुपर्षद्दत्तंव्रतंसमतमितिपूर्वोदाहृतमंगिरोवचनंतत्प्रा
तिलोम्येनानुष्ठितसाहसविषयं।तत्रमनुष्यमरणंचौर्यंपरदाराभिमर्शनं। पारुष्यमुभयंचेतिसाहसं राम० 
स्याच्चतुर्विधं।उभयमितिवाक्पारुष्यरूपंदंडपारुष्यरूपमित्यर्थः।स्त्रीणांविशेषमाहपराशरः वप १६
नंनैवनारीणांनानुव्रज्याजपादिकं।नगोष्ठेशयनंतासांनवसीरन्गवाजिनं।सर्वान्केशान्समुद्धृत्यछे

द्येदंगुलद्वयं।सर्वत्रैवहिनारीणांशिरसोमुंडनंस्मृतमिति पुरुषेषुविशेषःसंवर्तेनदर्शितःपादेंग
रोमवपनंद्विपादेश्मश्रुणोपिच त्रिपादेतुशिखावर्जंसशिखंतुनिपातनइति। पादप्रायश्चित्तार्ह
स्यकंठादधस्तनानांरोम्णामेववपनं।अर्द्धप्रायश्चित्तार्हस्यश्मश्रुणोपि। पादोनप्रायश्चित्तार्हस्यपु
नःशिरोगतानामपिशिखावर्जितानां। पादचतुष्टयार्हस्यतुसशिखस्यसकलकेशजातस्येत्यर्थः।
इतिगोवधप्रायश्चित्तं अथव्रात्यत्वादौ।तत्रसर्वोपपातकसाधारणेनप्रायश्चित्तचतुष्टयमाहयाज्ञ
वल्क्यः उपपातकशुद्धिःस्यादेवंचांद्रायणेनवा। पयसावापिमासेनपाराकेणाथवापुनः एवंउक्तंगो
वधव्रतेन। मासंपंचगव्याशनादिना। अत्रगोचर्मवसनगोपरिचर्यादिभिःगोवधस्यधारणंन्यूनं
वोध्यं। व्रात्यतादिषुविशिष्यापिप्रायश्चित्तं। तत्रतत्रस्मर्यते।तत्रव्रात्यतायांमनुः येषांद्विजानांसावित्री
नानूच्येतयथाविधि। तांश्चारयित्वात्रीन्कृच्छ्रान्यथाविध्युपनाययेदिति। येषांतुपित्रादयोप्यनुपनी

Indira Gandhi National
Centre for the Arts

९७ नास्तेषामापस्तंबेनोक्तं। यस्य पिता पितामहावनुपनीतौ स्यातां तस्य संवत्सरं त्रैविद्यकं ब्रह्मचर्यं
यस्य प्रपितामहादेर्नानुस्मर्यते। अ[illegible]पनयनं तस्य द्वादश वर्षाणि त्रैविद्यकं ब्रह्मचर्यमिति। त
थास्तेयेपि मनुराह। धान्यान्नधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः स्वजातीयगृहादेव कृच्छ्राब्दे
न विशुद्ध्यति। क्षत्रियादेस्तु क्रमेण पादं न्यूनं बोध्यं। तथा द्रव्याणामल्पसाराणां स्तेयं कृत्वान्यवे
श्मतः चरेत्सांतपनं कृच्छ्रं निर्यात्यात्मविशुद्धये। भक्ष्यभोज्यापहरणे यानशय्यासनस्य च। पुष्प
मूलफलानां च पंचगव्यं विशोधनमिति। अपण्यविक्रये हारीतः गुडतिलपुष्पफलपक्वान्न मूल
विक्रये सोमपानं। लाक्षालवणमधुमांसतैलघृतदधिक्षीरतक्रगंधचर्मवाससामन्यतमवि
क्रये चांद्रायणं। तथोर्णाकेशकेसरिभध्येनुवरमशस्त्रविक्रये च। भक्ष्यमांसस्नाय्वस्थिशृंगन राम०
खशुक्तिविक्रये तप्तकृच्छ्रः हिंगुगुग्गुलहरितालपानः शिलाजतुगैरिकक्षारलवणमणिमुक्ता ९

स्यिवंतं द्विजः त्रिरात्रमुपवासेन पंचगव्येन शुद्ध्यति पीयूषोऽभिनवं पयः पयसोऽभिनवत्वं प्रसवका
लिकमित्येके दशाहतः प्रागित्यपरे। श्वेतशब्दो लशुनवृंताकाभ्यां संबध्यते। तेन रक्तौ शुनक ल
लवृंताकादौ न दोष इति माधवः। गृंजनं पत्रविशेषः यदीयं चूर्णं गायकाः कंठशुद्ध्यर्थं भक्षयंति। मू
लविशेषो वा गाजरपर्याय इति द्वेधा व्याचष्ट माधवः विज्ञानेश्वरस्तु लशुनानुकारि सूक्ष्मनालः कं
दविशेष इति व्याख्यत्। वृक्षनिर्यासो हिंगुकर्पूरादिव्यतिरिक्तः हिंग्वादीनां भोज्यत्वाभ्यनुज्ञानादि
ति माधवः मूले। पलांडुं श्वेतवृंताकं कुसुंभं नव कंटकं। नालिकावालपुष्पं च भुक्त्वा दिनमभोज
नमिति अत्रापि पलांडुमिति श्वेतपलांडुर्वेवोपसंह्रियत इति माधवः सुमंतुस्तु लशुनपलांडुगृंज
नादीनुपक्रम्य एतान्येवातुरस्याभिषक्क्रियायामप्रतिषिद्धानि भवंति। यानि चान्यान्येवंप्रकाराणि तेषु
प्यदोष इति इत्युपपातकप्रायश्चित्तप्रकरणं। जातिभ्रंशकरादिषु प्रायश्चित्तमाह मनुः जातिभ्रंश

Indira Gandhi National
Centre for the Arts

करं कर्म कृत्वान्यतममिच्छया। चरेत्सांतपनं कृच्छ्रं प्राजापत्यमनिच्छया संकरापात्रक्रियासु मासः शोध
नमैंदवं मलिनीकरणीयेषु तप्तः स्याद्यावकस्त्र्यहमिति अथ प्रकीर्णकेषु प्रायश्चित्तं याज्ञवल्क्यः
प्राणायामी जले स्नात्वा खरयानोष्ट्रयानगः नग्नः स्नात्वा च भुक्त्वा च गत्वा चैव दिवा स्त्रियं। खरोष्ट्राभ्यां
युक्तं यानं रथाद्यारुह्य गच्छन् तज्जगाद्वा प्लुत्य कृतप्राणायामः शुद्ध्यतीत्यर्थः किंच गुरुं त्वं कृत्य हुंकृ
त्य विप्रं निर्जित्य वादतः बध्वा च वाससा क्षिप्रं प्रसाद्योपवसेद्दिनं एकवचनांतयुष्मच्छब्दप्रयोगपूर्वकं
निर्भर्त्स्येत्यर्थः वाससा मृदूपलक्षणमेतत्। यत्तु यमेनोक्तं। वादेन ब्राह्मणं जित्वा प्रायश्चित्तविधित्सया
त्रिरात्रोपोषितः स्नात्वा प्रणिपत्य प्रसादयेत्। मनुः विनाद्भिरप्सु वाप्यंतः शारीरं संनिषेव्य तु। सचैलो बहि
राप्लुत्य गामालभ्य विशुद्ध्यति विनाद्भिरिति अप्स्वसन्निहितास्वित्यर्थः शारीरं मूत्रपुरीषादि। किंच वेदो
दितानां नित्यानां कर्मणां समतिक्रमे स्नातकव्रतलोपे च प्रायश्चित्तमभोजनं। बृहस्पतिः अनिवर्त्य


महायज्ञान्यो भुंक्ते प्रत्यहं गृही अनातुरः सति धने कृच्छ्रार्द्धेन विशुद्ध्यति। आहिताग्निरुपस्थानं न कुर्या
द्यस्तु पर्वणि। ऋतौ न गच्छेद्भार्यां सोपि कृच्छ्रार्द्धमाचरेत्‌ इति। ऋष्यशृंगः दंडं चापपलाशाग्निं यद्यन्य
स्य प्रदर्शयेत्। प्रायश्चित्तमहोरात्रं धनुर्दंडश्च दक्षिणेति। आपस्तंबः नीलरक्तं यदा वस्त्रं ब्राह्मणांगेषु धा
रयेत् अहोरात्रोषितो भूत्वा पंचगव्येन शुद्ध्यति भृगुः स्त्रीधृतादाशयनेनीलीब्राह्मणस्य न दुष्यति। नृप
स्य वृद्धौ वैश्यस्य पर्ववर्जं विधारणमिति। तथा कंबले पट्टसूत्रे च नीलीरागो न दुष्यतीति शंखः अध्या
स्य शयनं यानं पादुकां दंतधावनं द्विजः पलाशवृक्षस्य त्रिरात्रं तु व्रती भवेत्। क्षत्रियस्तु रणे पृष्ठं दत्त्वा प्राण
परायणः संवत्सरं व्रतं कुर्याच्छित्त्वा वृक्षं फलप्रदं। द्वौ विप्रौ ब्राह्मणाग्नी च दंपती गोवृषौ तथा अंतरेण
यदा गच्छेत् कृच्छ्रं सांतपनं चरेत्। अंतर्वत्न्याः पतिः कुर्वन्न प्रजा भवति ध्रुवं। अयं च निषेधः सप्तमासा
दूर्ध्वं तथा च त्रिस्थलीसेतौ वचनं वपनं मैथुनं तीर्थं वर्जयेद्गर्भिणीपतिः श्राद्धं च सप्तमान्मासादूर्ध्वं

होमकाले तथा दोहे स्वाध्याये दारसंग्रहे। अंतरेण यदा गच्छेद्द्विजश्चांद्रायणं चरेत्। नोदन्वतोंभसि स्नायान्न च श्मश्रु चादिकर्तयेद् नु·२

Indira Gandhi National
Centre for the Arts

२० चान्यत्र वेदवित्। श्राद्धं श्राद्धभोजनमित्यर्थः अत्र सामान्यप्रायश्चित्तं योक्तं। तद्यथा। प्राणायामशतं कार्यं या
सर्वपापापनुत्तये। उपपातकजातानामनादिष्टस्य चैव हि इति। याज्ञवल्क्यः देशं कालं वयः शक्तिं पापं चा
वेक्ष्य यत्नतः प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिरिति। मनुः शरणागतं परित्यज्य वेदं विप्ला
प प्य च द्विजः संवत्सरं यवाहारस्तत्पापमपसेधतीति। षट्त्रिंशन्मते। चंडालश्रोत्रावकाशे श्रुतिस्मृतिपाठे ए
करात्रमभोजनमिति। बुद्धिकृते तु वसिष्ठ आह। पतितचांडालशवश्रवणे त्रिरात्रं वाग्यता। अनश्नंत
आसीरन्सहस्रपरं वा तद्भ्यस्यंतः पूता भवंति। सर्परिंतरागमने यम आह। सर्पस्य नकुलस्याथ अज
मार्जारयोस्तथा। मूषकस्य तथा छुछुंदरस्य च योषितः पुरुषस्यैडकस्यापि शुनोश्वस्य खरस्य च।
अंतरागमने सद्यः प्रायश्चित्तमिदं शृणु। त्रिरात्रमुपवासः स्यात्त्रिरह्नाभिषेचनमिति इति प्रकीर्ण राम०
प्रकरणं। अथ रहस्यप्रायश्चित्तप्रकरणं। तत्र याज्ञवल्क्यः अनभिख्यातदोषस्तु रहस्यं व्रतमाचरेदिति। २०

कर्त्तव्यातिरिक्ते पर्षदादिना दोषो न ज्ञातः रहस्यार्थः अतश्च पारदार्यादिरपि स्त्रीपुंसाभ्यामितरेण ज्ञातस्य रहस्य
तास्त्येव। तस्य प्रायश्चित्तमपि रहस्यमेव कर्त्तव्यं। तथा च हारीतः रहस्ये रहस्यं प्रकाशे प्रकाशकमिति
तत्र रहस्यानां साधारणं प्रायश्चित्तं मनुराह। वेदाभ्यासोन्वहं शक्त्या महायज्ञक्रियाक्षमा। नाशयंत्या
शु पापानि महापातकजान्यपि। यथैधस्तेजसा वन्हिः प्राप्तं निर्दहति क्षणात्। तथा ज्ञानकृतं पापं कृ
त्स्नं दहति वेदवित्। सव्याहृतिकप्रणवाः प्राणायामास्तु षोडश। अपि भ्रूणहनं मासात्पुनंत्यहरहः कृता
इति वसिष्ठः यद्यकार्यशतं साग्रं कृतं वेदश्च धार्यते। सर्वं तत्तस्य वेदाग्निर्दहत्यग्निरिवेंधनं यमः सहस्रप
रमां देवीं शतमध्यां दशावरां। गायत्रीं संजपेन्नित्यं महापातकनाशिनीमिति म्हले। ऋग्वेदमभ्यसेद्यस्तु य
जुः सामाथवापि च। सूक्तानि सरहस्यानि अथर्वांगिरसस्तथा ब्राह्मणानि च कल्पांश्च षडंगानि तथैव च
इतिहासपुराणानि देवतास्तवनानि च। जप्त्वा पापैः प्रमुच्येत धर्मस्थानैस्तथापरैरिति कूर्मपुराणे। जप

Indira Gandhi National
Centre for the Arts

२१ स्नपतीर्थसेवा देवब्राह्मणपूजनं। ग्रहणादिषु कालेषु महापातकशोधनं। पुण्यक्षेत्राभिगमनं सर्वपात
कनाशनं। देवताभ्यर्चनं नृणामशेषाघविनाशनं। अमावास्यां तिथिं प्राप्य समाराधयेद्भवं। ब्राह्मणा
न्भोजयित्वा तु सर्वपापैः प्रमुच्यते कृष्णाष्टम्यां महादेवं तथा कृष्णचतुर्दशीं। संपूज्य ब्राह्मणमुखे स
र्वपापैः प्रमुच्यते। त्रयोदश्यां तथा रात्रौ सोपहारं त्रिलोचनं। दृष्ट्वेशं प्रथमे यामे सर्वपापैः प्रमुच्यते। एका
दश्यां निराहारः समभ्यर्च्य जनार्दनं। द्वादश्यां शुक्लपक्षस्य सर्वपापैः प्रमुच्यते। उपोषितश्चतुर्दश्यां
कृष्णपक्षे समाहितः यमाय धर्मराजाय मृत्यवे चांतकाय च वैवस्वताय कालाय सर्वभूतक्षयाय च।
प्रत्येकं तिलसंयुक्तान्दद्यात्सप्तोदकांजलीन्। स्नात्वा नद्यां तु पूर्वाह्णे मुच्यते सर्वपातकैः तथा तत्रैवा॰
ध्यायांतरे। अस्मिन्कलियुगे घोरे लोकाः पापानुवर्तिनः भविष्यंति महाबाहो वर्णाश्रमविवर्जिताः नान्य राम॰
त्पश्यामि जंतूनां मुक्त्वा वाराणसीं पुरीं। सर्वपापप्रशमनं प्रायश्चित्तं कलौ युगे इति इति रहस्येषु सा २१

धारणप्रायश्चित्तानि अथ प्रतिपदोक्तानि याज्ञवल्क्यः त्रिरात्रोपोषितो जप्त्वा ब्रह्महा त्वघमर्षणं। अं
तर्जले विशुद्ध्येत गां च दत्त्वा पयस्विनीं। हविष्यांतीयमभ्यस्य नतमंह इतीति वा। जप्त्वा च पौरुषं सूक्तं मु
च्यते गुरुतल्पगः हविष्यांतमजरं नतमंहो न दुरितं इति वा इमि मे मनः सहस्रशीर्षा पुरुषः एषां चतु
र्णां सूक्तानामन्यतमं प्रत्यहं षोडश कृत्वो मासं जपित्वा कामतो गुरुतल्पगः शुद्ध्यतीति विज्ञानेश्वरा
दिसंमतोर्थः स्मृते। अतो देवा जपेत्सूक्तं अग्न आयूंषि चा ऋचं। अघमर्षणं च वाजस्त्वा मुच्यते ब्रह्महत्य
या इति रहस्यप्रपंचः अथ कृच्छ्रादिलक्षणं। तत्र सर्वव्रतसाधारणान्यंगानाह याज्ञवल्क्यः ब्रह्मच
र्यं दया क्षांतिर्दानं सत्यमकल्कता। अहिंसास्तेयमाधुर्ये दमश्चेति यमाः स्मृताः स्नानमौनोपवासे
ज्याध्यायोपस्थनिग्रहाः नियमा गुरुशुश्रूषा शौचाक्रोधाप्रमादता। ब्रह्मचर्यं सकलेंद्रियनि
ग्रहः उपस्थनिग्रहस्तु गोवलीवर्दन्यायेन निर्दिष्टः अकल्कता कुटिलता। दयाक्षांत्यादीनां पुरुषार्थ

Indira Gandhi National
Centre for the Arts

२२ तथाग्रासानामपि प्रायश्चित्तं गत्वार्थं पुनर्विधानं। तथाङ्कचित्फलांतरमप्यस्ति। तद्यथा विवाहादिषुम्य
नुज्ञानस्याप्यन्तनवदनस्यनिवृत्त्यर्थं सत्यविधानं। पुत्रीशिष्यादिरपि न तांडनीय इत्येवमर्थमहिंसावि
धानमिति विज्ञानेश्वराचार्यः मनुः अहिंसा सत्यमक्रोधमार्जवं च समाचरेत्। त्रिरह्नस्त्रिर्निशायां च
सवासा जलमाविशेत्। स्त्रीशूद्रपतितांश्चैव नाभिभाषेत कर्हिचित्। स्थानासनाभ्यां विहरेदशक्तोऽधः
शयीत वा। ब्रह्मचारी व्रती च स्याद्गुरुदेवद्विजार्चकः सावित्रीं च जपेन्नित्यं प्रायश्चित्तार्थमादृत इति। प्राजा
पत्यं कृच्छ्रं दर्शयति याज्ञवल्क्यः एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन चैकेन पादकृच्छ्रः प्रकी
र्त्तितः यथाकथंचित्त्रिगुणः प्राजापत्योयमुच्यते। एकभक्तेन दिवैव सकृद्भोजनेन। नक्तेन रात्रावेव सकृ
द्भोजनेन। अयाचितमिति। न केवलं परकीयान्नयाचनप्रतिषेधः पितुस्वीयमपि परिचारकभार्यादिभ्यो राम०
न याचनीयं। अप्रार्थिताअनाज्ञाताएवकेचिद्यदि भोजनद्रव्यमुपाहरेयुस्तेनाहोरात्रमध्ये सकृदेव भोक्त २२

व्यं। याञ्चाहि प्रेषणाध्येषणासाधारणीत्याहुः अत एव अथापरं त्र्यहं न कंचन याचेतेति गौतमः एकेनो
पवासेन च पादकृच्छ्रः अयमेव पादकृच्छ्रः यथाकथंचित्त्वस्थानवृद्ध्या द्वंद्वकलितवदावृत्त्यावात्रिरभ्य
स्तः सन्प्राजापत्यः एकभक्तादिषु ग्राससंख्यामाहुर्म्ले। प्रातस्तु द्वादश ग्रासाः सायं पंचदशैव तु अया
चिते द्वावष्टौ त्र्यहं मारुतभोजनमिति। आपस्तंबस्तु संख्यांतरमाह सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंश
तिर्मताः पराशरस्तु सायं तु द्वादश ग्रासाः प्रातः पंचदश स्मृताः चतुर्विंशतिरायाच्याः परं निरशनं स्मृतमि
ति एतच्चोत्तरार्द्धं आपस्तंबपराशरश्लोकयोः समानं। शक्त्यपेक्षया व्यवस्थितो विकल्प इति माधवाचा
र्यः ग्रासप्रमाणं तु। कुक्कुटांडप्रमाणोसौ यथा वास्यं विशेत्सुखमिति स्मर्तवेवो ध्यं। आपस्तंबश्चतुर्द्धा प्रा
जापत्यं विभज्य चतुर्णां पादकृच्छ्राणां वर्णभेदेन व्यवस्थामाह त्र्यहं निरशनं पादः पादश्चायाचितं त्र्यहं
सायं त्र्यहं तथा पादः पादः प्रातस्तथा त्र्यहं। प्रातः पादं चरेच्छूद्रः सायं वैश्यस्य दापयेत् अयाचितं तु राज्ञ

Indira Gandhi National
Centre for the Arts

२३ न्येत्रिरात्रं ब्राह्मणे स्मृतमिति। अर्द्धकृच्छ्रपादेन कृच्छ्रस्वरूपं स एवाह। सायं प्रातर्विधानं स्यात्पादेनान्न
क्रवर्जितमिति। अयाचितोपवासरूपत्र्यहद्वयेनार्द्धकृच्छ्रः नक्तत्र्यहेतरत्र्यहत्रयेण पादेन कृच्छ्
र इत्यर्थः। अर्द्धकृच्छ्रस्य प्रकारान्तरं स एवाह सायं प्रातस्तथैकैकं दिनद्वयमयाचितं। दिनद्वयं च नाश्नी
यात्कृच्छ्रार्द्धं तद्विधीयते। न इति। नक्तैकभक्तेन अयाचितद्वयेनोपवासद्वयेन चार्द्धकृच्छ्र इत्यर्थः। अ
त्रापि शक्त्यपेक्षया व्यवस्थेति माधवः। अधिकारिविशेषं प्रति शिशुकृच्छ्रमाह वसिष्ठः। अहः प्रातर
हर्नक्तमेकमयाचितं। अहः पराकं तत्रैकमेकं चतुरहो परः। अनुग्रहार्थं विप्राणां मनुर्धर्मभृतां
वरः। बालवृद्धातुरेष्वेवं शिशुकृच्छ्रमुवाच ह इति। पराकमुवास। अतिकृच्छ्रलक्षणमाह मनुः। एकैकं ग्रा राम॰
समश्नीयात्त्र्यहाणि त्रीणि पूर्ववत्। त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन्द्विजः। यत्तु याज्ञवल्क्येनोक्तं २३
अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजन इति। अयं प्रकृतः प्राजापत्यकृच्छ्र एव एकभक्तनक्तया

चितदिवसेषु नवसु पाणिपूरणपर्याप्तमेवान्नं यदि भुज्यते न पुनर्द्वाविंशत्यादिग्रासाः तदातिकृ
च्छ्र इत्यर्थः। तदेतदशक्तविषयं। कृच्छ्रातिकृच्छ्रलक्षणं विष्णुयाज्ञवल्क्यावाहतुः। कृच्छ्रातिकृच्छ्रः पयसा
दिवसानेकविंशतिं वर्जनमिति शेषः। अथात्र शूलपाणिः पयोत्र जलं। चरेत्कृच्छ्रातिकृच्छ्रं च पिवेत्तोयं
च शीतलमिति विष्णुपुराणादित्याह। तच्च प्रातः सायं मध्याह्नेषु ग्राह्यं। एकविंशतिरात्रं तु कालेष्वेतेषु
संयत इति ब्रह्मपुराणवाक्यशेषादिति स एवाह। गौतमस्तु लक्षणान्तरमाह। अब्भक्षस्तृतीयः स कृ
च्छ्रातिकृच्छ्र इति। एकभक्तादिषु नवसु दिवसेषु यो भोजनकालस्तस्मिन्नेव काले केवलमुदकेन वर्त्तन
मित्यर्थ इति माधवः। द्वादशरात्रमुदकेन वर्त्तनमित्यर्थ इति विज्ञानेश्वरः। उपवासदिनत्रये जलग्रहणा
ग्रहणयोर्विप्रतिपत्तिः पर्यवस्यति। अत्रापि विद्वच्छक्त्यपेक्षया व्यवस्था। पराकमाह याज्ञवल्क्यः
द्वादशाहोपवासेन पराकः परिकीर्त्तित इति। षडहः सांघ्यं सौम्यकृच्छ्रं स एवाह पिण्याकाचामतक्राम्बुस

Indira Gandhi National
Centre for the Arts

कृनां प्रतिवासरं। एकरात्रोपवासंश्च कृछ्रः सौम्योयमुच्यते। आचाम ओदननिस्रावः पिण्याकादीनां
२५ पंचानामेकैकं प्रतिदिनमुपयुज्य षष्ठे हन्युपवसेदित्यर्थः जाबालस्तु चतुरह व्यापिनं सौम्यकृछ्र
माह पिण्याकं सक्तवस्तक्रं चतुर्थे हन्यभोजनं। वासोवैदक्षिणां दद्यात्सौम्यो यं कृछ्र उच्यते इति। उ
भयत्रापि यावता प्राणयात्रामात्रं निवर्हति तावदेव पिण्याकादिग्राह्यं। शक्तभेदेन व्यवस्थेत्याहुः दि
नद्वयसाध्यं दिनत्रयसाध्यं च सांतपनं कृछ्रमाह यमः गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं। एक
रात्रोपवासंश्च श्वपाकमपि शोधयेत्। कपिलायां तु दुग्धायां धारोष्णं तु पयः पिबेत्। एष सांतपनः कृछ्रः
सर्वपापप्रणाशनः अत्र गोमूत्रादिषट्कं प्राश्य परदिने उपवासे दिनद्वयसाध्य एकः सांतपनः कृछ्रः
दिनत्रयसाध्ये तृतीयेन्हि कपिलाक्षीरमधिकमिति शूलपाणिर्व्याख्यातं। सप्ताहसाध्यं सांतपनं ब्र राम०
ह्मपुराणे प्रथमे हनि नाश्नीयान्मूत्राशी ततः पुनः तृतीये गोमयाशी स्याच्चतुर्थे क्षीरपो भवेत्। पंचमे द २५

थ। कुशोदकं सप्तमे च कृछ्रे सांतपने विधिरिति। पर्णकृछ्रमाह याज्ञवल्क्यः पर्णोदुंबरराजीवबिल्वपत्र
कुशोदके प्रत्येकं प्रत्यहं पीतैः पर्णकृछ्र उदाहृतः पलाशोदुंबरारविंदबिल्वपर्णानामेकैकं क्वथित
मुदकं प्रत्यहं पिबेत्। कुशोदकं चैकस्मिन्नहनीति पंचाहः साध्यः पर्णकृछ्रः पर्णकूर्चमाह यमः ए
तान्येव समस्तानि त्रिरात्रोपोषितः शुचिः क्वाथयित्वा पिबेदद्भिः पर्णकूर्चो विधीयत इति। पलाशादिप
त्राण्येकीकृत्य क्वाथयित्वा त्रिरात्रोपवासांते क्वथितं जलं पिबेदिति चतुरहः साध्यः पूर्णकूर्च इत्यर्थः
फलकृछ्रादीनां स्वरूपमाह मार्कंडेयः फलैर्मासेन कथितः फलकृछ्रो मनीषिभिः श्रीकृछ्रः श्रीफलैः
प्रोक्तः पद्माक्षैरपरस्तथा। मासेनामलकैरेवं श्रीकृछ्रमपरं स्मृतं। पत्रैर्मतः पत्रकृछ्रः पुष्पैस्तत्कृ
छ्रमुच्यते। मूलकृछ्रः स्मृतो मूलैः तोयकृछ्रो जलेन तु यद्वा बिल्वादिफलान्यंभसा क्वाथयित्वा मा
समेकं सदंभः पिबतीति तदा फलकृछ्रो भवति। यदि बिल्वपद्माक्षामलकानामन्यतमस्य क्वाथं मासं पिबेत्त

Indira Gandhi National
Centre for the Arts

२५ दाश्रीकृच्छ्रोभवति।वारुणकृच्छ्रमाहयमः ब्रह्मचारीजितक्रोधोमासेष्वुदकसक्तुकान्।पिवेद्व्रतनियताहा
रः कृच्छ्रवारुणमुच्यते।स्त्रीकृच्छ्रंस एवाह।त्र्यहंपिवेत्तुगोमूत्रंत्र्यहंवैगोमयंपिवेत्।त्र्यहंवैयावकेनस्त्रीकृ
च्छ्रंह्येतत्तदुच्यतेइति·तप्तकृच्छ्रमाहयाज्ञवल्क्यः तप्तक्षीरघृतांबूनामेकैकंप्रत्यहंपिवेत्· एकरात्रोपवा
सश्चतप्तकृच्छ्रउदाहृतः तुलापुरुषाख्यंकृच्छ्रंस एवाह।एषांत्रिरात्रमभ्यासादेकैकस्ययथाक्रमं·तुला
पुरुषइत्येवंज्ञेयं।पंचदशाह्निकइति।एषांसौम्यकृच्छ्रघटकत्वेनप्रकृतानांपिण्याकादीनांपंचानांद्र
व्याणांक्रमेणैकैकस्यत्रिरात्राभ्यासेपंचदशदिवससाध्यः तुलापुरुषाख्यः कृच्छ्रइत्यर्थः अष्टदिवस
साध्यंतुतुलापुरुषांतरंस्मर्यते।पिण्याकंचतथाचामंतक्रंचोदकसक्तवः त्रिरात्रमुपवासश्चतुलापुरु
षउच्यतेइति।यमस्त्वेकविंशतिदिवससाध्यमाह।आचाममथपिण्याकंतक्रंचोदकसक्तुकान्। राम० २५
त्र्यहंत्र्यहंप्रयुंजानोवायुभक्षस्त्र्यहद्वयं।एकविंशतिरात्रस्तुतुलापुरुषउच्यतेइति।तदेतत्तुलापुरुषत्रि

कंपापतारतम्येनव्यवस्थापनीयमितिमाधवः अत्रेतिकर्तव्यताविशेषमाहहारीतः द्वौचंदनोशीरमयौ
पुरुषौकारयेत्स्वटे।नदीमृत्तिकयापिपुरुषौद्वौतुकारयेत्।सौवर्णीराजतीवापितुलांदेवींतुकारयेत्·अ
पिचंदनवृक्षस्यखदिरस्यापिकारयेत्।ततोभगवतेमहादेवायतुलापुरुषायइदमासनंगंधादीन्नीतिपू
जयेत्।तुलादेवीचऋषिसत्यमित्यादिनाभिमंत्र्यपूजयेदित्यादि।यावककृच्छ्रंदेवलआह।यवानामप्सु
सधितानांसप्तरात्रंपक्षंमासंवाप्राशनंयावकइति।शंखस्तु गोपुरीषयवाभ्यासोमासमेकंसमाहितः
व्रतंतुयावकंकुर्यात्सर्वपापापनुत्तयइति।चांद्रायणमाहवसिष्ठः एकैकंवर्द्धयेत्पिंडंशुक्लेकृष्णेचह्रा
सयेत्।इंदुक्षयेनभुंजीतएषचांद्रायणेविधिरिति।एतच्चमासंतचोरणीयत्वान्मध्येस्थौल्याच्चयवसादृ
श्याद्यवमध्यमित्युच्यते।एतदेवव्रतंकृष्णपक्षप्रतिपद्युपक्रम्यानुष्टीयमानंपिपीलिकामध्यं।तत्रहिप्र
तिपदिचतुर्दशग्रासाः क्रमेणचग्रासह्रासाच्चतुर्दश्यामेकोग्रासः अमायामुपवासः पुनःप्रतिपद्येकग्रास

Indira Gandhi National
Centre for the Arts

२६ वृद्ध्या चतुर्दश्यां चतुर्दश पौर्णमास्यां पंचदशेति पिपीलिकावन्मध्ये ह्रासः तथा च वसिष्ठः मासस्य कृष्णप
क्षादौ ग्रासान्वृद्ध्या चतुर्दश ग्रासापचयभोजी सन्पक्षशेषं समापयेत्। तथैव शुक्लपक्षादौ ग्रासं भुंजीत चाप
रं। ग्रासोपचयभोजी सन्पक्षशेषं समापयेत्। यदा तु ह्रासवृद्धिभ्यां पक्षस्य चतुर्दश दिनानि षोडश वा स्युस्तदा
ग्रासानामपि वृद्धिह्रासौ बोध्यौ। तिथिह्रासवृद्ध्या पिंडाः स्युरिति वचनात्। चांद्रायणांतरमाह। याज्ञवल्क्यः।
यथाकथंचित्पिंडानां चत्वारिंशच्छतद्वयं। मासेनैवोपयुंजीत चांद्रायणमथापरमिति। चत्वारिंशदधिकं
शतद्वयं सावनमासमध्ये यथाकथंचित्प्रतिदिनं मध्यान्हे ष्टाविति वा साद्यं प्रातश्चतुरश्चतुरो वा। एकस्मिं
श्चतुरः अपरस्मिन्द्वादशेत्यादि वा यथेच्छमित्यर्थः। गौतमोक्तं द्वात्रिंशद्दिवससाध्यं चांद्रायणं तु तत एव बो राम०
ध्यं। सोमायनमाह मार्कंडेयः। गोक्षीरं सप्तरात्रं तु पिबेत्स्तनचतुष्टयात्। स्तनत्रयात्सप्तरात्रं सप्तरात्रं स्तनद्व २६
यात्। स्तनैकेन तु षड्रात्रं त्रिरात्रं वायुभुग्भवेत्। एतत्सोमायनं नाम व्रतं किल्बिषनाशनमिति। व्रतांतराण्यन्य।

तो बोध्यानि ग्रंथगौरवभयात्तु नोच्यंते इति व्रतनिरूपणं। अथ व्रतग्रहणप्रकारः तत्र विष्णुः सर्वपापेषु
सर्वेषां व्रतानां विधिपूर्वकं। ग्रहणं संप्रवक्ष्यामि प्रायश्चित्ते चिकीर्षिते। दिनांते नखरोमादीन्प्रवाप्य स्ना
नमारभेत्। तस्मगोमयमृद्वारिपंचगव्यादिकल्पितैः मलापकर्षणं कार्यं बाह्यशौचोपशुद्धये। दंतधा
वनपूर्वेण पंचगव्येन संयुतं। व्रतं निशामुखे ग्राह्यं वन्हिस्तारकदर्शने। आचम्यातः परं मौनी ध्यायन्दुष्कृ
तमात्मनः मनः संतापनं तीव्रमुद्वहेच्छोकमंततः वहिरिति ग्रामान्निष्क्रम्येत्यर्थः। पूर्वद्युर्निशामुखे व्र
तपरिषदुपदिष्टप्रकारेण संकल्प्य परेद्युस्त्रिषवणस्नातः प्रातर्होमाद्यंगकलापसहितमनुतिष्ठेत्। अं
गान्याह जाबालः आरंभे सर्वकृच्छ्राणां मासमासौ विशेषतः आज्येनैव हि शाकल्यो जुहुयाद्दाहुतीः पृथक्।
श्राद्धं कृत्वा व्रतांते च गोहिरण्यादिदक्षिणेति बौधायनः केशश्मश्रुनखलोमवपनं चांद्रायणेषु। एतद्वे
स्त्रियाः केशवपनवर्ज्यमिति। हारीतः राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः केशानां वपनं कृत्वा प्राय

Indira Gandhi National Centre for the Arts

श्चितं समाचरेत्। केशानां रक्षणार्थं तु द्विगुणं व्रतमाचरेत्। द्विगुणे तु व्रते चीर्णे दक्षिणा द्विगुणा भवेत्॥
२७ तच्च महापातकादिदोषविशेषाभिप्रायं। विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनं। व्रते महापातकिनो गो-
हंतुश्चावकीर्णिन इति स्मरणात्। तथा गात्राभ्यंगं शिरोभ्यंगं तांबूलमनुलेपनं। व्रतस्थो वर्जयेत्सर्वं यच्चा-
न्यद्बलरागकृत्। छागलेयः पूर्वं व्रतं चरित्वा तु नाचरेत्कामतो हि यः जीवन्भवति चांडालः मृतः श्वा वा
विजायते। अथ प्रागुक्तव्रतानामनुष्ठाने शक्तं प्रति तत्प्रत्याम्नायानाहुर्मदनरत्ने। कृच्छ्रोदेव्ययुतं चैव प्रा-
णायामशतद्वयं। तिलहोमसहस्रं तु वेदपारायणं तथा विप्रा द्वादश वा भोज्याः पावकेष्टिस्तथैव च।
अन्या वा पावमानेष्टिः समाम्नाहुर्मनीषिणः गायत्रीदशसहस्रजपप्रभृतयः सप्त प्राजापत्यकृच्छ्रस्य प्र-
त्याम्नाया इत्यर्थः पराशरः कृच्छ्रायुतं च गायत्र्या उदवासस्तथैव च धेनुप्रदानं विप्राय सममेतच्चतुष्ट- राम॰
यमिति। ब्रह्मपुराणे। गवामभावे निष्कस्यात्तदर्धं पादमेव वा। मदनरत्ने। जन्मप्रभृति पापानि बहूनि विवि- २७

धानि च। कृत्वाऽब्रह्महत्यायाः षडब्दं कृच्छ्रमाचरेत्। प्रत्याम्नायो गवां देयः साशीतिर्धेनिनाशनं।
तथाष्टादशलक्षाणि गायत्री वा जपेद्बुध इति। इदमेव द्वादशवार्षिके व्रते द्वादशदिनैरेकैककृच्छ्रक-
ल्पनायां लिंगमिति विज्ञानेश्वरः ननूक्तरीत्या द्वादशवार्षिकप्राजापत्यप्रत्याम्नायत्वेन षट्त्रिंशल्ल-
क्षसंख्याको गायत्रीजपः प्राप्नोति। कोटिसंख्याकस्तु स्मर्यते मदनरत्ने। गायत्र्यास्तु जपेत्कोटिं ब्रह्मह-
त्यां व्यपोहति। लक्षाशीतिं जपेद्यस्तु सुरापानाद्विमुच्यते। पुनाति हेमहर्तारं गायत्रीलक्षसप्ततिः गा-
यत्र्याः षष्टिभिर्लक्षैर्मुच्यते गुरुतल्पग इति। तथा च परस्परविरुद्धोयं ग्रंथ इति चेन्न। गायत्रीकोटिजपा-
दिर्नानुकल्पः किंतु द्वादशवार्षिके सहसमकक्षो विकल्प इति विज्ञानेश्वरमाधवप्रभृतिभिरनयैवा-
नुपपत्त्या सिद्धांतितत्वात्। चांद्रायणप्रभृतिप्रत्याम्नायानाह मदनरत्ने। चांद्रायणं मृगारेष्टिः पवित्रेष्टिस्तथै-
व च। मित्रविंदा पशुश्चैव कृच्छ्रमासत्रयं तथा। तिलहोमायुतं चैव पराकद्वयमेव च। गायत्र्या लक्षजप्यं च स-

Indira Gandhi National
Centre for the Arts

२८ मान्याह बृहस्पतिः नित्यनैमित्तिकानांच काम्यानां चैव कर्मणां इष्टीनां पशुबंधानामभावे चरवः स्मृ
ताः पराकत्रय कृच्छ्राणां स्थाने कृच्छ्रत्रयं भवेत् । प्राजापत्ये तु गामेकां दद्यात्सांतपने द्वयं पराकतस्या
ति कृच्छ्रे तिस्रस्तिस्रस्तु गास्तथा अष्टौ चांद्रायणे देयाः प्रत्याम्नायविधौ सदेति स्पष्टोर्थः यस्तु तप
स्यसमर्थः धान्यसमृद्धश्च स कृच्छ्रादिव्रतानि ब्राह्मणभोजनेन संपादयेदित्याह मल्लिः कृच्छ्रे पंचाति
कृच्छ्रे त्रिगुणमहरहस्त्रिंशदेव तृतीये चत्वारिंशच्चतस्रो त्रिगुणितगणिता विंशतिः स्यात्पराके । कृच्छ्रे
संतापनाख्ये भवति षडधिका विंशतिः सैव हीना द्वाभ्यां चांद्रायणे स्यात्तपसि कृशबलो भोजयेद्विप्रमु
ख्यान् । अहरहरिति सर्वत्र संबध्यते । तृतीय इति । कृच्छ्रातिकृच्छ्र इत्यर्थः एवं स्थिते प्राजापत्यादिदिव
ससंकलनया विंशद्विप्राणां षष्टिभोजनं भवति यत्तु प्राजापत्यप्रत्याम्नायत्वेन विप्रा द्वादश भोज्या इति राम० २८
पूर्वमुक्तं तत्तन्निषेधविषयकं । एवं प्राजापत्ये तु गामेकामति कृच्छ्रे द्वयं स्मृतं चांद्रायणे पराके चाति

---

धसूरिसूनुना भट्टोजिदीक्षितेन विरचितायां चतुर्विंशतिस्मृतिव्याख्यायां प्रायश्चित्तकांडम् ॥
३१ संवत्सरे १८ ६० मार्ग० कृष्णचंद्रवासरे लेखितायां सन्निधौ काश्यां शुभंस्यात्॥ ॥छ॥

राम० ३१

Indira Gandhi National
Centre for the Arts